Click here to go back

# Rahu Mantra - Devanagari

॥ श्री महागणपतये नमः ॥
Indian Astrology Source
www.astrovidya.com

## अथ राहु मंत्रः

ओं अस्य श्री राहु महामंत्रस्य वामदेव ऋषिः। गायत्री छंदः। राहुर्देवता। राहु प्रसाद सिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) धूम्रवर्णाय अंगुष्ठाभ्यां नमः। कराळवदनाय तर्जनीभ्यां नमः। खंडवराय मध्यमाभ्यां नमः। शूराय अनामिकाभ्यां नमः। शूलधराय कनिष्ठिकाभ्यां नमः। नीलसिंहासनस्थाय करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) धूम्रवर्णाय हृदयाय नमः। कराळ वदनाय शिरसे स्वाहा। खंडवराय शिखायै वषट्। शूराय कवचाय हुं। शूलधराय नेत्रत्रयाय वौषट्। नीलसिंहासनस्थाय अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) कराळवदनं खड्ग चर्म शूलवरान्वितं। नीलसिंहासनस्थं च ध्यायेद्राहुं प्रशांतये॥ (लमित्यादि पंच पूजा) ओं लं पृथ्वितत्वात्मने गंधान्धारयामि। ओं हं आकाशतत्वात्मने पुष्पं समर्पयामि। ओं यं वायुतत्वात्मने धूपमाघ्रापयामि। ओं रं वह्नितत्वात्मने दीपन्दर्शयामि। ओं वं अमृततत्वात्मने अमृतनैवेद्यं समर्पयामि। सर्वतत्वात्मने सर्वोपचार पूजां समर्पयामि॥ कया नश्चित्र आभुवदूती सदावृधस्सखा। कया शचिष्ठया वृता॥ इति राहु मंत्रः॥

**Please consider the environment -**

**do not print unless essential**

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back